# अध्यायः- ७

# उपसंहारः

# अध्यायः– ७

# उपसंहारः

यत्र मर्त्याः अमर्त्याः वसन्ति इति वास्तु। सामान्यतः भवननिर्माणार्थमुपयुक्ता भूमिः वास्तु ज्ञायते। परन्तु वास्तोः क्षेत्रं तु व्यापकमस्ति। वास्तोः अन्तर्गतं न केवलं भवनम् अपि तु ग्रामम्, नगरम्, पुरम्, दुर्गः, मन्दिरम्, मार्गः, कूप–वापी–तडाग–सरोवरः, मण्डपः, यानम्, शयनम्, उद्यानम्, प्रतिमा आदीनां संशोधनं निर्माणं जीर्णोद्धार च समाविष्टो भवति। मानसार–मयमतमादिवास्तुशास्त्रीयग्रन्थेषु वास्तुशब्दस्यान्तर्गतं मुख्यतया भूमिः, भवनम्, यानम्, शयनं च दर्शितमस्ति। अनन्तरं तेन सह ग्रामम्, नगरम्, पुरम्, दुर्गः, पत्तनम्, पुटभेदनम्, मूर्तिकला–आदिरपि परिगणितमस्ति। परन्तु समराङ्गणसूत्रधारग्रन्थे तदतिरिक्तं वास्तोः अधिकं व्यापकं क्षेत्रं दर्शितम्। वस्तुतः कापि निर्मित वस्तु इति वास्तु कथ्यते। भारतीयवास्तुशास्त्रीयदृष्ट्या समस्तभूमण्डलं स्थापत्यस्य प्रतिपाद्यमस्ति।

मानवानां मूलभूत आवश्यकतायां भोजनम्, वस्त्रमेवमावासः वर्तते। अतः वास्तुविद्यायाः उद्भवः अपि मानवसभ्यतायाः उद्भवेन सह जातः। एतस्य मुख्योद्देशः स्वस्य सुरक्षा एवं ऋतुभिः संरक्षणमासीत्। वास्तुविद्यायाः मुख्यविशेषज्ञौ विश्वकर्मा मयश्च वर्तते। मत्स्यपुराणानुसारं वास्तुप्रणेतारः अष्टादशः परिगणिताः। अन्येषु पुराणेषु वास्तुशास्त्रीयग्रन्थेषु च विविधा अन्ये अपि वास्तुशास्त्रप्रवर्तकाचार्याः परिगणिताः वर्तन्ते।

प्राचीनभारते वास्तुविद्याविषये नैकग्रन्थाणामाविष्कारोऽभवत्। एतेषु ग्रन्थेषु वास्तुशास्त्रीयसूक्ष्मातिसूक्ष्मविषयाणां विस्तृतं विवेचनं विद्यते। एतेषु ग्रन्थेषु अस्माकं

ऋषिमुनीनां पूर्वजानामुन्नतं कला–कौशलस्य ज्ञानं दृश्यते। वास्तुशास्त्रविषयकग्रन्थेषु विश्वकर्मवास्तुशास्त्रम्, राजवल्लभवास्तुशास्त्रम्, अपराजितपृच्छा, विश्वकर्माप्रकाशः, मयमतम्, समराङ्गणसूत्रधारः, मानसारः, वास्तुविद्या, वास्तुमण्डनमादिमहत्त्वपूर्णाः ग्रन्थाः समाविष्टाः वर्तन्ते। एतेषां वास्तुविद्या–शिल्पकला– सम्बन्धिसिद्धान्तानां प्रतिपादनं प्राप्यते। एतेषां न केवलं सिद्धान्तानामपि तु सैद्धान्तिकविवेचनेन सह कलाविषयक – वास्त्वाकृतीनामलङ्करणविषयक वर्णनमपि विद्यते। प्रायः वास्तुशास्त्रीयग्रन्थेषु भवनादीनां निवेशने सैद्धान्तिकदृष्ट्या पूर्वदिशायाः सर्वाधिकं महत्त्वं दृश्यते। कारणं सूर्योदयः पूर्वदिशायां भवति। सूर्योदयकालिककिरणाः सर्वमनुष्याणां कृते स्वास्थ्यप्रदायकाः। अतः नगर–ग्राम–गृहादीनां सन्निवेशने वास्तुशास्त्रीयसिद्धान्तानां निर्देशाः प्राप्यन्ते। प्रातःकालिकसूर्यरश्म्याः प्रवेशः सरलतया विना अवरोधेन भवेत् इत्याशयः। भवनादीनां एवं प्रकारेण सन्निवेशनार्थं दिग्ज्ञानस्य महत्त्वमपि अतीव वर्तते। प्राचीनकाले आधुनिक –दिग्ज्ञानार्थस्य यन्त्रं नासीत्। तदा वास्तुविशारदैः काष्ठनिर्मितशङ्कोः स्थापनं कृत्वा दिग्ज्ञानं प्राप्यते स्म।

वास्तुनिर्माणस्य प्राक् परिगृहीतभूमौ दिग्ज्ञानस्याधारेण वास्तुपदमण्डलस्य प्रकल्पनं, वास्तुपुरुषस्य अवस्थित्याः कल्पनं वास्तुशास्त्रस्य प्रथमः सिद्धान्त एवं भारतीयवास्तुकलायाः परम्परा अस्ति। अस्माकं वास्तुशास्त्रीयग्रन्थेषु विविधप्रकारस्य भिन्न–भिन्नपदसंख्यायुक्तं वास्तुपदमण्डलं भिन्न–भिन्नसंज्ञया वर्णितं वर्तते। मयमतग्रन्थे द्वात्रिंशत्वास्तुपदमण्डलानां वर्णनं प्रयोगसहितं वर्तते। ग्रामस्य, नगरस्य, दुर्गस्य, गृहस्य, भवनादीनां भिन्न–भिन्नवास्तुकर्मणि भिन्न–भिन्नवास्तुपदमण्डलानां प्रयोगः भवति। प्राचीनकाले भवन–नगरादीनां निवेशने वास्तुपदविन्यास्तथा तस्योपरि वास्तुपुरुषाङ्गानां निरूपणं क्रियते स्म। एतेन नगराङ्गानां भवनाङ्गानां च रचनायां सरलता–सुगमता भवति स्म। अतः नगर–प्रासाद–भवनादीनां विन्यासस्य सिद्धान्तानां नियमानां ज्ञानं स्थपतीनां प्रप्रथमा योग्यता मन्यते।

वास्तुकर्मणि वास्तुपदमण्डलस्य दिग्ज्ञानस्य, वास्तुपुरुषविकल्पनस्य इत्यादीनां ज्ञानं तु भवति, परन्तु यदा मान–प्रमाणस्य ज्ञानं  न भवेत, तदा किमपि वास्तुकर्ममशक्यमस्ति। अतः नगरस्य, ग्रामस्य, पत्तनस्य, दुर्गस्य, भवनस्य इत्यादीनां निवेश्यभूमि तथा तस्य पृथक्–पृथक्– अङ्गोपाङ्गानां सुन्दर रचनायाः प्रकल्पना मानस्याभावे कथं भवति? प्राचीनकाले यद्यपि पृथक्–पृथक् वास्तुकर्म सिद्धयर्थं भिन्न–भिन्नमानोपकरणानि प्रचलितानि आसन्। भिन्न–भिन्नमानेन नगरस्य, ग्रामस्य, मार्गस्य, प्रासादस्य, गृहस्य इत्यादीनां प्रमाणं निश्चितं भवति। प्राचीनकाले हस्तमानं वास्तुकर्मणि आधारभूतमानमासीत्।

नगरग्रामादिसर्ववस्तूनां निर्माणे आयः, व्ययः, नक्षत्रं, तारा, अंशकः, गणादीनां वास्तुशास्त्रीय– अङ्गानां सम्यक्रूपेण मेलापकं क्रियते स्म। तेषां महत्त्वं वास्तुकर्मणि वर्तते। शुभ– आय–व्ययादीनां प्राप्तिहेतुः, तेषां मानं किञ्चित् न्यूनाधिकं कृत्वा शुभप्रदपिण्डस्य प्राााप्तिर्भवति स्म। केवलं शुभ आय–व्ययादीनां प्राप्त्यार्थं न अपि तु भिन्न– भिन्न– विशेष प्रयोजनार्थं निर्मितभवनानां विशिष्टाकृतिनिर्माणार्थं तथा तेन द्वारा तस्य प्रयोजनं किमस्ति, कस्य भवनमस्ति, भवनस्य उद्देशं किमस्ति आदिकं ज्ञातुं शक्यते। एषा अस्माकं भवनादीनां विशिष्टाकृतीनां परम्परा आसीत्। भिन्न–भिन्ननगराणां, ग्रामाणां, मार्गाणां, मन्दिराणां, भवनादीनां रचना एवं विशिष्टाकृती प्रदानार्थं शिल्पिः मुख्यः आसीत्। शिन्ल्पिनः लोके चतुर्धा वर्तन्ते – स्थपतिः, सूत्रग्राही, वर्धकी तक्षकश्च। एतेनां चतुर्णां स्थपतिः मुख्यः शिल्पिः अस्ति। सूत्रग्राही, वर्धकी, तक्षकश्च तस्य आज्ञानुसारिणो भवन्ति। एते चतुर्धा शिल्पिनः स्व–स्वकर्मणि निपुणाः सन्ति। तैः सह सः ज्ञानी, जितेन्द्रियः, चारित्रशीलः, धार्मिकः, सदाचारी, सुशीलः इति गुणैः युक्तः भवेत् इति आवश्यकमस्ति। स्थपतीनां कृते शास्त्रज्ञानेन सह तस्य अनुरूपरचनाकार्ये निपुणता, प्रत्युत्पन्नस्य ज्ञानमादिगुणाः अपि अनिवार्याः सन्ति। स्थापत्यशास्त्रस्य ज्ञानस्यातिरिक्तं सामुद्रिकशास्त्रस्य, गणितस्य, ज्यौतिषस्य,छन्दस्– शिल्प– यन्त्रकर्मविधेः ज्ञानं

भवेत्। अष्टाङ्गस्थापत्यस्य ज्ञानमपि परमावश्यकमस्ति। स्थपतिः नानाविधगुणैः युक्तः एवं वास्तुकर्मणि निपुणः सूत्रग्राही, वर्धकी, तक्षकश्च भवेत् इति आवश्यकमस्ति। एतेषां पूज्यभावसहितं महत्ता समाजे वर्तते।

नगरनिर्माणार्थं भूपरिग्रहणार्थं भूपरीक्षायाः वर्णनं अस्माकं वास्तुशास्त्रीयग्रन्थेषु विस्तारपूर्वकं वर्णितं दृश्यते। स्थापत्यविज्ञाने वास्तुकर्मणि भूरेव मुख्यवस्तुः स्यात्। अतः भूपरिग्रहणस्य अतीवं महत्त्वं वर्तते। प्राचीनकाले कस्यापि वास्तोः निर्माणस्य प्राक् वास्तुविद्वज्जनैः भूचयनार्थं भूपरीक्षणमावश्यकं मन्यते। स्थलस्य परितो वातावरणं , सुरक्षा, भूम्याः फलता आदीनां मानवजीवनेन सह सम्बन्धिनां कतिपयमहत्त्वपूर्णबिन्दूनामुपरि विशेषरूपेण चिन्तनं क्रियते स्म। ग्रामस्य, जनपदस्य, नगरस्य च निवेशने स्वर्ण-रजतादिखनिजपदार्थानां प्राप्तिः भवेत्, वनस्पति-वृक्षैः परिपूर्णं भवेत्, जलस्य सामीप्यं भवेत्, कृषि उत्पादनमधिकमात्रायां भवेत् इति गुणैः युक्ता धरा नगरादीनां निवेशनार्थं उत्तमा प्रख्याता। ब्राह्मणादिवर्णानां भूमिलक्षणं वर्ण-रस-गन्धादिगुणानुसारेण उपयुक्ता भूमिः मन्यते। ब्राह्मणादिवर्णानां कृते क्रमशः श्वेता, रक्ता, पीता, कृष्णा भूमिः उपयुक्ता मन्यते। गृहादीनां निवेशने विभिन्नदिशायां प्लवः: तैः एवं ध्वनि आधारितं भूम्याः शुभाशुभत्वस्य निर्णयो भवति स्म। पूर्व- उत्तर- ईशान- प्लवा भूः सर्ववर्णानां कृते उत्तमा मन्यते। भूम्यां बीजाङ्कुरस्य कालावधि- अनुसारं भूम्याः फलतायाः ज्ञानं भवति। भवनादीनां निर्माणस्थलस्य मृत्तिकायाः परीक्षणे भूम्याः दृढतायाः ज्ञानं भवति। तत्कालिकसमाजे भूपरीक्षणस्य विविध पद्धतयः आसन्। भूमौ खातं कृत्वा जलं पूरयित्वा वा मृत्तिका पूरयित्वा मृत्तिकायाः दृढतायाः परीक्षणं कृत्वा दृढभूमौ भवनादिकं निर्मीयते स्म। भारतीयसमाजे भस्म- अस्थि- पाषाणादि-शल्ययुक्ता भूमिं तथा सिंहादिहिंसक वन्यप्राणिनां निवासयुक्तं स्थलमावासादीनां स्थापनार्थम्

अशुभं मन्यते। अतः यत्र वास्तुशास्त्रीयग्रन्थेषु वर्णितायाम् उत्तमभूमौ ग्रामनगरभवनादीनां स्थापनं करणीयमिति बोधः।

अस्माकं वास्तुशास्त्रीयग्रन्थेषु ग्रामनगराणां विविधाः प्रकाराः, तेषां लक्षणाधारेण विस्तृतरूपेण वर्णितं विद्यते। समराङ्गणसूत्रधारग्रन्थानुसारं ग्रामनगरादीनां मान– प्रमाणाधारेण, तथा यन्नगरे राज्ञः वसति तन्नगरं राजधानी इति विविधाः प्रकाराः वर्णिताः। मयमतम् इति ग्रन्थे अपि ग्रामनगरेषु स्थितानां मार्गसंख्यानामाधारेण तथा वसति– आधारेण तेषां विविधाः प्रकाराः वर्णिताः। राजवल्लभवास्तुशास्त्रम्, विश्वकर्मवास्तुशास्त्रमादि अन्यवास्तुशास्त्रीयग्रन्थेषु विविधग्रामनगराणां तेषामाकाराधारेण भौगोलिकस्थित्यानुसारेण वर्णनं प्राप्यते। भिन्न–भिन्ननगराणां वर्णनमस्माकं संस्कृतवाङ्मयेषु संस्कृतसाहित्येषु अपि बहु विद्यते।

नगरनिवेशने भूपरिग्रहणान्तरं नगरस्य मापनं भवति। नगरस्य परितः चतुर्दिक्षु एका सीमा निश्चिता भवति स्म। अनन्तरं नगरे नगरस्य विविधाङ्गानां निवेशनं भवति। नगरस्य सन्निवेशने नगरस्य सम्बन्धिनां नगरे स्थापनीयानामन्यवस्तूनां निवेशनं कुत्र, कथं करणीयमिति विषयानां ज्ञानमपि अतीव आवश्यकमस्ति। नगरभूम्याः विविधाङ्गानां निवेशनार्थं दिगाधारेण मानप्रमाणेन वास्तुपुरुषस्य विकल्पनमेवं वास्तुपदमण्डलाधारेण विभाजनं करणीयम्। प्रथमं नगरे वप्रस्य, प्राकारस्य, परिखायाः, राजप्रासादस्य, देवप्रासादस्य, मार्गाणां, चत्वराणाम्, अट्टालकादीनां निर्माणं कस्मिन् दिशायां केषु स्थलेषु भविष्यति इति निर्धारणं कृत्वा रेखाचित्र–मानचित्रस्य निर्माणं क्रियते स्म। नगर–ग्राम–खेटादीनां सन्निवेशने चतुःषष्ठिवास्तुपदमण्डलं प्रयुज्यते। वर्णानुसारमेवं कर्मानुसारं निवासस्थानानां विन्यासे सरलता भवेत् इत्याशयेन नगरे मार्गाणां विन्यासः तथा च वप्रस्य, प्राकारस्य परिखायाः निर्माणं सुरक्षाहेतवे नगरे प्रप्रथमं क्रियते स्म। मार्गाणां विन्यासे प्रथमं राजमार्गस्य स्थापनं कृत्वा अन्यमार्गाणां स्थापनं भवति स्म। मार्गाणां मेलने चत्वरस्य निर्माणं भवति। अतः नगरे चत्वराणां संख्या मार्गाणां मेलनस्य

संख्यायाः उपरि आधारितास्ति। शुक्रनीतिग्रन्थानुसारं राजमार्गस्याकारः कूर्मपृष्ठाकारसमानं निर्मितव्यः। कारणं मार्गस्योपरि वर्षा- आदीनां जलस्य सङ्ग्रहः न भवेत् इत्याशयः। नगरेषु, ग्रामेषु दृढमार्गाणां निर्माणं भवति स्म। नगरे राजमार्गाणामतिरिक्तं यानमार्गाणां, महारथ्या-रथ्या-जङ्घापथादीनां मार्गाणां निर्माणमपि तत्कालिकनगरेषु जनसमुदयानां सुविधाहेतवे भवति स्म। नगरे जनव्यवस्थायामन्तर्गतं वापी- कूप- तडागादि- जलाशयानां निर्माणं जनानां प्राथमिकप्रथममावश्यकतायाः पूर्त्यर्थं भवति स्म। जलाशयानामाश्रितस्थलेषु वा नगरे अन्य-भिन्न-भिन्न स्थलेषु आरामोद्यानानां, जलोद्यानानां, वाटिकानां स्थापने विविधवृक्षाणां वपनं क्रियते तथा नगरे नगरजनानां मनोरञ्जनार्थं नाट्यगृहाणि, नृत्यशालाः- आदिकानाम् अनुरञ्जनस्थानानां स्थापनमपि भवति स्म। नगरजनानां मनोरञ्जनार्थं वर्तमानकालेऽपि नाट्यशालादीनां स्थापनं भवति, परन्तु तदनन्तरं चलचित्रस्यागमने चलचित्रगृहाणां निर्माणमधिकतया भवति। कस्यचित् कालस्य प्राक् एकस्मिन् चलचित्रगृहे एकस्य एव चलचित्रस्य चालनं भवति, परन्तु इदानीं तु एकस्मिन् चलचित्रगृहे एकतः अधिकानां चलचित्राणां चालनं भवति। एतद् भवनं 'मल्टिप्लेक्ष' इति नाम्ना विख्यातम्।

नगरस्य सन्निवेशने नगरे एकस्मिन् दिशायां च एकस्मिन् भागे एकस्य एव वर्णस्य जनानां तथा एकसमानं व्यवसायि कर्मोपजीविनामधिवासाः स्थाप्यन्ते। एतेन नगरवासिनां मध्ये असुविधा असुखं च न भवेत् इत्याशयः। तेन सह नगरस्य विभिन्नदिशोपदिशायां नगरस्य अन्तः एवं बहिः भिन्न-भिन्न देवी-देवतानाम् आयतनानि स्थाप्यन्ते। तेन राज्ञा सह प्रजायाः धार्मिकतायाः दर्शनं भवति।

राजधानीनगरे राजप्रासादस्य निवेशनं प्रायः नगरस्य मध्यभागे सुरक्षाया एवं शासनसञ्चालनस्य सुविधाहेतवे भवति स्म। राजनिवेशाङ्गानामन्तर्गतं मुख्यराजप्रासादस्यातिरिक्तं राजप्रमुखः, महामन्त्री, सेनापतिः, युवराजः, राजमहिषी,

राजपुरोहितः, राजप्रशासनाधिकारी, सामन्तादीनामावासानि स्थाप्यन्ते। तदतिरिक्तं गजशाला, अश्वशाला, सभाभवनादीनामङ्गानां स्थापनमपि तत्र भवति स्म। राजप्रशासने न्यायसम्बन्धिव्यवहारकार्यहेतवे सभाभवनस्य निर्माणं क्रियते स्म।

प्राचीनभारते नगरवासिनां सुरक्षायाः दायित्वं राज्ञः अस्ति इति मन्यते स्म। अतः राज्ञः आत्मरक्षायाः च नगरवासिनां सुरक्षाहेतवे नगरस्य सन्निवेशने दुर्गस्य निर्माणं प्रथमावश्यकता वर्तते। क्वचित् नगरस्य सन्निवेशनं गिरिदुर्ग, जलदुर्ग, पङ्कदुर्ग, इरिणदुर्गादि प्राकृतिकस्वरूपेण प्राप्तदुर्गे भवति स्म। प्राकृतिकदुर्गस्य सुरक्षा यत्र न लभ्यते तत्र नगरस्य परितो परिखा–वप्र–प्राकारादीनां कृत्रिमदुर्गस्य निर्माणं भवति स्म। कालान्तरेण दुर्गस्य प्रकल्पनं पृथक्रूपेण भवति। वर्तमानकालेऽपि अस्माकं भारतदेशे नैकप्राचीननगरेषु दुर्गाणामवशेषाः दृश्यते। एतेन मानवानां सुरक्षोपायानां साधनेषु दुर्गस्य महत्त्वं वर्तते।

नगरे नगरजनानां सुविधाहेतवे प्रतिदिनस्य व्यवहारसम्बन्धिनामन्य– आवश्यकभवनानां स्थापनमपि भवति स्म। कस्यापि नगरस्य वा देशस्य विकासे नागरीकाणां शिक्षणमतीव महत्त्वपूर्णं वर्तते। शिक्षणेन नगरस्य विकासः भवति। अतः नगरे शैक्षणिकभवनानामर्थात् विद्यालयानां महाविद्यालायानां च, पुस्तकालयाणां स्थापना नगरजनानां शिक्षणहेतवे निश्चितरूपेण करणीयेति विश्वकर्मादि– वास्त्वाचार्यानां अभिप्रायः। अधुना साम्प्रतिकाले तु शिक्षणस्य महत्त्वमतीव वर्तते। शिक्षणेन विना मानवाः पशुसमानाः। नगरे नगरवासिनां प्रतिदिनस्य जीवनोपयोगि वस्तूनां क्रय–विक्रयार्थं आपण–विपणस्य व्यवस्था अपि अतीव महत्त्वपूर्णा वर्तते। नगरस्य अष्टदिशायां च ब्रह्मभागे विभिन्नस्थलेषु भिन्न–भिन्नवस्तूनाम् आपणस्य स्थापनं भवति स्म। तदर्तिरिक्तं मञ्जिष्ठं, मरीचं, पिप्पलकं हारिद्रं, मधुघृततैलादिकं, औषधिं च नगरे सर्वतः स्थापनीया। आपणस्य आवश्यकता ग्रामेषु नगरेषु महत्त्वपूर्णा वर्तते। अधुना अपि भविष्यत्कालेऽपि तथैव महत्त्वं दृश्यते। अधुना लघु–लघु आपणानां स्थाने 'मॉल'

इति बृहद्- आपणस्य प्रचलनं लोके अतीव वर्तते। जनाः लघु-लघु आपणतः क्रीणितुं न इच्छन्ति परन्तु बृहद्- मॉल इति आपणतः क्रीणितुं इच्छन्ति। मॉल मध्ये जीवनोपयोगीनि सर्ववस्तूनि एकस्मिन् स्थले एव लभ्यन्ते। अतः इतः अन्यस्थले व्यथर्म् अट्टणं न भवति। तेन समयस्य व्यर्थ व्ययः अपि न भवति। प्राचीनसमये एकस्मिन् स्थले एकस्मिन् वस्तूनां विपणं स्थाप्यते स्म। अधुना अपि प्राचीननगरेषु प्राचीनापणे एषा स्थितिः दृश्यते। परन्तु मॉल इति आपणस्यागमने स्थितिः भिन्ना दृश्यते। तत्र प्रत्येकवस्तूनि एकस्मिन् भवने प्राप्यन्ते।

अस्माकं प्राचीनवास्तुशास्त्रीयाचार्यैः गृह-ग्राम-नगरादीनां रचनायाः प्रतिपादिताः सिद्धान्ताः महत्त्वपूर्णाः सन्ति। वर्तमानकाले निवेशितनगरे वास्तुशास्त्रीयग्रन्थेषु निर्दिष्ट प्रशस्तभूम्याः अनुपलब्धता, धरायाः उच्चमूल्यमादिकारणात् प्राचीनवास्तुशास्त्रीयनियमानां पालनं पूर्णतः असम्भवं भवति। तथापि वास्तुशास्त्रस्य मौलिकसिद्धान्ताः दिङ्निर्णयः, वास्तुपदविन्यासः- आदीनां नियमानुसारं प्रयत्नपूर्वकं यथा सम्भवं भवन-गृह-ग्राम-नगरादीनां निर्माणं यथाशक्ति वास्तुशास्त्रीयसिद्धान्तानुसारं कर्तुं शक्यते।

कस्यापि ग्राम- नगरस्य निर्माणयोजनायां निवेश्यभूमिचयनं, भवनानामायुष्यादीनां दृष्ट्या भूपरीक्षा, आधुनिकविकसितस्य एवं आदर्शनगरस्य आवश्यकतानुरूपं विन्यासः कार्यः अर्थात् मुख्यमार्गाः, उपमार्गाः, वीथिः, चिकित्सालयः, आपणम्, मनोरञ्जनगृहाणि, उद्यानानि, पुस्तकालयाः, रक्षकस्थानं(पोलीसस्टेशन), वायुयानस्य स्थानं, रेलस्थानं, लोकयानस्य स्थानं, क्रीडाङ्गणानि, विभिन्नव्यवसायिकभवनानि, प्रशासनिकभवनानि, प्रशासनकाधिकारिणामावासाः, सैनिकावासाः, कारावासः, वृक्षाः- आदीनां स्थापनार्थं समस्तनगरस्य निवेश्यभूम्याः पदविभाजनं तथा आधुनिककालानुसारं सुरक्षायाः उपायाः इत्यादीनां वास्तुशास्त्रीय सिद्धान्तानां यथासम्भवं अनुपालनं कर्तुं शक्यते। अस्माकं वास्तुशास्त्रीयग्रन्थेषु नगर-गृहादीनां निर्माणे वृक्षारोपणस्य, जलाशयनिर्माणस्य अतीव महत्त्वं

प्रतिपादितमस्ति। एतेन पर्यावरणस्य सुरक्षा तु भवति, पर्यावरणस्य सुरक्षाया: सह जनानां स्वास्थ्यवर्धनं भवति, तेन सह जनानामार्थिकवृद्धिरपि भवति, जनानामार्थिकवृद्धिया समाजस्य– नगरस्य विकासो अपि जायते। तत्र सर्वप्रकाराणां सुखा: अपि उपलभ्यन्ते।

नगरनिर्माणे क्वचित् प्रमादवशत: वा अज्ञातवशत: दोषा: अपि भवन्ति। समराङ्गणसूत्रधारग्रन्थे नगररचनाया: गुणा: दोषाश्च विस्तृतरूपेण शुभाशुभफलसहितं राजा भोज: दर्शितवान्। गर्हितनगराणाम् एकादश प्रकारा: राजा भोज: वर्णितवान्। अप्रशस्तनगरे निवासतां जनानां विभिन्नव्याधय:, दस्युभयम्, अनारोग्यम्, अल्पायु:, निर्धनता, पराजय:, शत्रुभयम्, दुष्टराज्ञ: प्राप्ति:, पुरुषाणां स्त्रीद्वारा पराजय:, विषरोगा:, चित्तभ्रमा:– आदीनि अशुभफलानि भवन्ति। दुश्चरित्रस्त्रीयुक्ता:, तथा बहुजना: नपुंसका: भवन्ति, तथा एतत् नगरस्य राजा प्रजासहितं नष्टो भवति। अत: यत्नपूर्वकं राज्ञा एवं स्थपतिना वास्तुशास्त्रीयग्रन्थेषु निर्दिष्टनियमानुसारं यथानुरूपं प्रशस्तनगरस्य निर्माणं करणीयम्।

मनुष्याणां जीवने वास्तुशास्त्रस्य तथा पञ्चतत्त्वानामतीव महत्त्वं वर्तते। तेषां सजीवानां जीवने प्रत्यक्ष: सम्बन्ध: वर्तते। पञ्चतत्त्वानामाधारेण, वास्तुपदमण्डलानामाधारेण, दिशाया: आधारेण वास्तुशास्त्रीयसिद्धान्ता: वर्तन्ते। पञ्चतत्त्वा: अस्माकं जीवने प्रत्येकक्षणे प्रत्यक्षरूपेण सम्मिलिता सन्ति। एतेषां प्रभाव: मानवजीवने प्रत्येकक्षणे भवति। अत: वर्तमानकालेऽपि प्रत्येकमानवेन प्रयत्नपूर्वकं यथासम्भवं वास्तुशास्त्रीयनियमानुसारं गृह–भवन–नगरादीनां तथा आधुनिकानां सोसायटी इत्यादीनां निर्माणं करणीयम्। तन्नगरेषु ग्रामेषु जना: चिरकालपर्यन्तं सर्वप्रकाराणां सुख–समृद्धि–ऐश्वर्य–दीर्घायुरादीनां सुखानामुपभोगं कुर्वन्ति। इत्यलं विस्तरेण।